M T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 236

Title: Mahimana Stotra

236

Incomplete

Mahimna Stotra	Title
	Author
महिम्न स्तोत्र/	Editor
	Year, Vols.
	Publisher
236	Remarks

236

।।

घनश्यामस्य

॥श्रीगणेशाय नमः॥ ॥हे हर ते तव महिम्नो महत्वस्य परंपारं मर्यादामवसानमविदु
षोऽज्ञानतः पुरुषस्य स्तुतिर्यद्यसदृशी अयोग्या स्वल्पार्था अननुरूपा भवति तर्हि ब्रह्मादीना
मपि गिरो वाचस्त्वयि त्वद्विषयेऽवसन्नाः अयोग्याः कुंठिताः अथेति पक्षांतरे सर्वः समस्तपुरु
षः स्वमतिपरिणामावधि यथा भवति तथा गृणन् स्तुवन् अवाच्यः अनुपालंभनीय इति

महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गि
रः अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः
परिकरः १ अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितम

यावत् अनिंद्यः स्वमतिस्वबुद्धिस्तस्याः परिणामः परिपाकः सोऽवधिः सीमा यस्मिन्निति क्रिया
विशेषणं ममापि स्तोत्रेण वक्तुर्नो एष परिकरो यत्नो निरपवादो निर्दोष इति वाक्यार्थः १
अतीत इति हे देव तव महिमा वाङ्मनसयोः पंथानमतीतः लंघितवान् मार्गमतिक्रांतः १

वाक् च मनश्च वाङ्मनसे अचतुरस्रेत्यादिसूत्रेण समासांतो निपातः तयोः किंभूतः महिमा
यं श्रुतिरपि वेदोऽपि अतद्व्यावृत्त्या चकितमभिधत्ते तत्र भवतीत्यनेन अतदो व्यावृत्तिः
[redacted]पर्युदासः वर्जनं तेनापि चकितं [redacted]सभयं यथा भवति
तथाभिधत्ते ब्रूते न तु इदं भवतीति निर्दिश्याभिधत्ते। स महिमा कस्य स्तोतव्यः केन स्तो

भिधत्ते श्रुतिरपि स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पत
ति न मनः कस्य न वचः २ मधुस्फीता वाचः परमममृतं निर्मितस्तवनस्तवश्रल

तुं वक्तुं न शक्यते कतिविधगुणः कतिप्रकारा गुणा यस्य सः कतिविधगुणः किंयंतो वा गुणा
यस्येति ज्ञातुं न शक्यते कस्य विषये गोचरः। अनेन ते परमार्थस्वरूपज्ञानं कस्यापि नास्ती
त्युक्तं। स्मृतिपुराणोक्तरूपं सर्वैर्ज्ञायत इति विवक्षुमाह पद इत्यादि। अर्वाचीने प्रत्ययस्र १
दिक्षु स्थिति गुरुघ्य नया प्राप्यनुग्राहके पदे स्थाने तु कस्य मनश्चित्तं न पतति न प्रसरति क

महि०टी०
२

स्यवाचोनपततिअपितुर्ब्रह्मादेर्मनापीतिवाक्यार्थः २ इदानींमहात्म्यस्यस्तोतुमशक्य
त्वेपिस्तुवतोयोदोषस्तंपरिहर्त्तुमाह मधुस्फीतेति हेपुरमथन हेब्रह्मन् नवसुरगुरोर्बृह
स्पतेरपिवाक्वाणीविस्मयपदंआश्चर्यस्थानंभवतीकिंनभवतीसर्वथाः किंभूतस्यतववचो
गिरोनिर्मितवतोरचयतः किंभूतावाचःमधुस्फीताःमधुनामाधुर्यगुणेनस्फीताःमुक्ताःपुनः
न किंवागपिसुरगुरोर्विस्मयपदं ममत्वेतांवाणींगुणकथनपुण्येनभवतःपुनामि
त्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता ३ तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्
किंभूताःपरमममृतंमुत्कृष्टममृतंअमृतस्वरूपप्रतिपादकत्वात्अमृतमित्युपचारः अस्मद
देर्वाक्किंपुनःपद्येवस्तुतिकिमर्थंप्रारम्भतइत्याह ममबुद्धिस्तुएतांमदीयांवाणींभवत
स्तवगुणकथनपुण्येनपुनामीत्यस्मिन्नर्थेकृतोद्यमा ३ आत्मस्तुतेःसावकाशत्वंप्र
तिपाद्येदानींमीमांसकाःईश्वरोनास्तीतिवदंतितान्निराकर्त्तुमाहतवेति हेवरद हेअभय २

दतवयदैश्वर्यंजगदुदयरक्षाप्रलयकृत् जगतांलोकानांउत्पत्तिरक्षापरिपालनंचप्रलयो
विनाशस्तेतिद्वंद्वस्तान्करोतीतितत्कृत् किंभूतं त्रयीवस्तुत्रय्येववेदत्रयंवस्तुप्रतिपाद्यंत
थापितिसृषुतनुषुमूर्त्तिषुव्यस्तंविभज्यनिर्दिष्टं किंभूतासुतनुषुगुणभिन्नासु गुणैःसत्वरजः
तमोभिर्भिन्नासुपृथग्भूतासु ब्रह्मविष्णुरुद्रात्मिकासु इहलोकेकेचिज्जडधियोमंदबुद्धयो
त्रयीवस्तुव्यस्तंतिसृषुगुणभिन्नासुतनुषु अभव्यानामस्मिन्वरदरमणीयामरमणीं
।विहंतुंव्याक्रोशींविदधतइहैकेजडधियः ४ किमीहःकिंकायःसखलुकिमुपायस्त्रि
।स्मिन्नैश्वर्येव्याक्रोशींनिंदांविदधतेकुर्वतेकिंकर्त्तुंविहंतुंविनाशयितुंकिंभूतांव्याक्रोशींअभया
नांनास्तिभव्यंभद्रंकल्याणंयेषांतेअभव्यास्तेषामपुण्यभाजांरमणीयांमनोहरां पुनःकिंभूतां
परमार्थतस्तत्त्वतःअरमणीमसुभगांअमनोहरेपिमनोहरबुद्धिरम्याआपाततोयातेषामित्यर्थः
४ एतामेवव्याक्रोशींप्रगटयन्नाह किमीहइति हेवरदइतिपूर्वश्लोकात्संबोधनानुषंगः

म०टी० तिसृषु गुणभिन्नासु तनुषु तवैश्वर्यं व्यस्तमिति अनेन धातृरूपेण सृजति विष्णुरूपेण पालय
३ ति रुद्ररूपेण संहरतीत्युक्तं तद्दूषयन्नाह किमीह इति धाता भूत्वा ब्रह्मरूपेण त्रिभुवनं सृजन् किमी
हः सृजति का ईहा चेष्टा व्यापारो यस्य स तथोक्तः त्रिभुवनं स्वर्गमर्त्यपाताललक्षणं किंकायः सृजति कः
कायः शरीरं यस्य स तथोक्तः तथापि किमुपायः सृजति कः उपायः सामग्री यस्य स तथोक्तः कि

भुवनं किमाधारो धाता सृजति किमुपादान इति च अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो
हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ५ कायः शरीरं यस्य स तथोक्तः त

थापि किमुपायः सृजति कः उपायः सामग्री यस्य स तथोक्तः किमाधारः सृजति क आधारो अधि
करणं यस्य स कुत्र स्थित्वा सृजतीत्यर्थः किमुपादानः सृजति कार्येण सह समवेतं तदुपादानकारणं
समवायिकारणं भुवनं येन निष्पाद्यमस्येति यथा घटस्य मृत्पिंड उपादानकारणं पटस्य तंतव ३
इति किं शब्दप्रश्ने इति शब्दः शंकांतरसमुच्चयार्थः कुलालो हि घटं कुर्वन् स्वशरीरेण व्याप्रि

यमानेन चक्रभ्रमणादिचेष्टया सलिलसूत्राद्युपायेन चक्रादावाधारे मृदमुपादानकारण
भूतां घटाकारां करोति एवं जगत्कर्तापि वाच्यस्तथा च कुलालादिवदीश्वर एवेत्यभिप्रायः।
तथाविधादधिकर्तरि स्वेपधिकं यया वदृष्टं क्षित्यादिकर्तृत्वमपि तावदवश्यमंगीकर्तव्यं दृष्टांतस्य
तुल्यत्वात् तथा चोभयतः पाशारज्जुः तदंगीकारे अस्मदादीश्वरत्वं तदनंगीकारे कर्तृत्वानुपप
त्त्यासिद्धिरित्येवंरूपकुतर्कः जगतो जनस्य मोहाय भ्रममुत्पादयितुं कांश्चिन्मुखान्मुखरयति वा
चालयति किंभूतान् हतधियः दुर्बुद्धीन् किंभूतः कुतर्कः त्वयि अनवसरदुःस्थः अवसरोऽव
काशः न अवसरस्तेन दुःस्थो दुर्बलस्तुच्छ इत्यर्थः त्वयि विषये न स्थानमवसरः एव विचित्रनाना
शक्तिमायावशेन सर्वं निर्मातरि सर्वतर्कागोचरे त्वयि नास्ति कुतर्कावसर इत्यर्थः तथा चोक्तं अ
चिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति किंभूते त्वयि अतर्क्यैश्वर्ये अतर्क्यमतुलमैश्वर्यं
यस्य तस्मिन् ५ एवं प्रतिकूलतर्कपरिहारायानुकूलतर्कमुद्भावयन् स्तौति अजन्मान इति

म॰टी॰ हे अमरवर देवश्रेष्ठ अवयववंतोपि लोकाः किमजन्मानः किं जन्मरहिताः न विद्यते जन्म
५ येषां ते अजन्मानः किं स्युः आहोस्वित् येषामवयववान् स अजन्मेति नोपपद्यते यथा सावयवो घटः उत्प
त्तिमान् नैवं दृश्यते अवयवं तु सावयवत्वं उत्पत्तिमान् एतावता किं लभ्यत इत्याह जन्मवतां जगतां लोका
नां भवविधिः उत्पत्तिः अधिष्ठातारम् अनुसादनकर्तारम् अनादृत्य अनपेक्ष्य भवति किं यतो यस्मात् कारणा

अजन्मानो लोकाः किमवयववंतोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति अनी
न शो वा कुर्याद्भुवनजनने कः परिकरो यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ६

दिमे मंदाः स्वल्पबुद्धयो मीमांसकादयस्त्वां प्रति त्वामुद्दिश्य संशेरते संशयं कुर्वते अतस्त्वां प्रति सं
देहेन कर्तव्य इत्यभिप्रायः एतावदुक्तेपि किं पुनः पूर्वपक्षे भयवत्वधिष्ठाना च एतावता किमीश्व
र इति दिशति अभिप्रायेणाह अनीश इति ईश्वरादन्योपि कुर्यात् एतदपि दूषयति भुवनजनने लोकोत्पाद ५
नेकः परिकरः कः समर्थः ईश्वरं विना नान्यः समर्थ इत्यर्थः ६ त्रयीति त्रयाणां वेदानां समाह

रस्त्रयी असावेको मार्गः तथा सांख्यं कापिलं शास्त्रं पंचविंशतितत्त्वोपलक्षितं स एको मार्गः
योगो योगशास्त्रं वासिष्ठादि स एको मार्गः पशुपतिमतं शैवागमस्तेन सिद्धांताः शैवसि
द्धांतसोमसिद्धांतवर्णाश्रमसिद्धांतः अकुलसिद्धांतः स एको मार्गः वैष्णवं वैष्णवागमः ए
को मार्गः इत्यनेन प्रकारेण प्रस्थाने मार्गे प्रभिन्ने नानात्वं गते सति प्रस्थीयते गम्यतेनेनेति

त्रयी सांख्यं योगः पशुमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च रुची
नां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ७

प्रस्थानं मार्गः तस्मिन्प्रभिन्ने सति इदं प्रस्थानं परमुत्कृष्टं नास्मात्परमस्तीति एवंप्रकारे रु
चीनामिच्छानां वैचित्र्याद्भिन्नत्वादृजुकुटिलनानापथजुषां केचिन्मार्गा अत्र ऋजवः प्रांजलाः
केचिन्मार्गाः कुटिला वक्रा इति नानापथजुषामनेकमार्गसेविनां नृणां मनुष्याणां त्वमेको
गम्यः प्राप्योसि येन केन मार्गेण गच्छतां त्वमेव प्राप्य इत्यर्थः पयसामर्णव इव इति यथा त्रै

म०टी० ऋजुकुटिलमार्गेण गच्छतां जलानां समुद्र एक एव प्राप्य इत्यर्थस्तथा त्वमित्यर्थः ७ महोक्ष इति
५ महोक्षश्चासावुक्षा चेति महोक्षः महान्बलीवर्दः महोक्ष इत्यच्चतुरादिसूत्रेण महोक्षः पर्यस्तु नगो
ऽदन्त्यकारान्तो निपातः खट्वाङ्गं तु सुखं सुन इति हैमः खुभ अभिधवेख खट्वाङ्गं प्रसिद्धं परशुः कुठा
रः अजिनं चर्म भस्म भसितं फणिनः सर्पाः कपालं शिरोऽस्थि चकारः समुच्चये इति शेषः वधा
महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणं सु
रास्तां तामृद्धिं दधति च भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ८
रणे इयदेतावत् हे वरद अभयप्रद तव तन्त्रोपकरणं उपक्रियतेऽनेनेति उपकरणमुपकारकमित्यर्थः
तन्त्ररूपेण प्रापञ्चकरूपेण स्थितमुपकरणमेतावदेव सुरास्त्विन्द्रादयस्तां तामृद्धिं संपदं विद
धति धारयन्ति किंभूतां भवद्भ्रूप्रणिहितां भ्रूक्षेपमात्रेणोपपादितामित्यर्थः यद्येवमेताव ५
ती शक्तिरस्ति तर्हि भगवान्स्वयं कस्मान्नोपभुङ्क्ते इत्याह न हीत्यादिना स्वात्मनि स्वकीय आत्म

न्यारमति क्रीडतीति स्वात्मारामं भगवन्तं विषयमृगतृष्णा न भ्रमयति न चालयति इन्द्रिय
गोचरो योऽर्थः शब्दादिर्विषयः स एव मृगतृष्णा मरीचिका एतदुक्तं भवति भगवान्परमयो
गी विषयैर्न बाध्यत इत्यर्थः ८ ध्रुवमिति हे पुरमथन त्रिपुरहन्तः कश्चिदिदं समस्तं दृश्य
मानं व्यापी सर्वमिदं जगत् ध्रुवं नित्यं गदति न कदाचिदनीदृशं जगदिदं ब्रवीति अपरोऽमहो
ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ९
णभङ्गवादी बौद्धः जगदिदमध्रुवं क्षणिकं वदति परस्ततोऽन्यः क्षपणकः वीतरागी मध्यस्थ
प्रवञ्चमानः एतस्मिन्समस्ते जगति ध्रौव्याध्रौव्ये नित्यानित्यत्वे व्यस्तविषये वदति आका
शादिपञ्चकं नित्यं घटादिकमनित्यमिति ब्रुवत इत्यर्थः एवं नानाप्रकारेण वदद्भिस्तैर्विस्मितो
पहसितो व्याकुलित इवाहं त्वां स्तुवन्न जिह्रेमि न लज्जे न हि स्तोतुं कथं प्रवर्त्तसे तत्राह मुखर

म०टी० वाचाच तनाननुग्रमेण धत्ता खलु न बलवतीन प्रगल्भा न क्षोभनेत्यर्थः ९ इदानींपुरा
९ णप्रसिद्धं ब्रह्मविष्ण्वोरनुभवपरीक्षितं देवस्य स्वरूपं तवैश्वर्यमिति हे गिरिश भूमाकरनचप
देश्वर्यं मानत्वं तदैश्वर्यमन्यामहत्ता यत्नेनेयपरिच्छेत्तुं एतावदितिनिश्चेतुमुपरि ऊर्ध्वं वि
रंचो ब्रह्मा यातः अधः पाताले हरिर्विष्णुर्यातः इति सह वे वियातौ अनलं परिच्छेत्तुं मसमर्थौ या

तवैश्वर्यं यत्नाद्यदुपरि विरिंचो हरिरधः परिच्छेत्तुं यातावनलमनिलस्कंधवपुषः त
तो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति १०

तौ किं भूतस्य तव अनलस्कंधवपुषः अनलस्कंधो ऽग्निसमूहो वपुः शरीरं यस्य तस्य वृ
त्तिज्वलत्स्कंध इति पाठस्तत्र वायुशरीरस्य ततः पश्चात् भक्तिश्रद्धाभरगुरुगृणद्भ्यां भक्ति
र्भजनं श्रद्धा विश्वासस्तयोर्भरेण महत्त्वेन गुरु गृणाधिकं यथा भवति तथा गृणद्भ्यां ताभ्यां ९
ब्रह्मविष्णुभ्यां तव वैश्वर्यं स्वयमेव न स्तब्धं स्वेनैव प्रकाशितमित्यर्थः प्रनितो निर्णयप्रका

रो बुद्धिस्थितस्तु विनिष्ठते रात्मनेपदं तेयथा छत्रायपतिष्ठते कुमारीति नादर्थे चतुर्थी हे देव तव
तानुवृत्तिः सेवा किं न फलति किं न प्रयच्छति सर्वमपि फलतीत्यर्थः १० नदेवद्दृष्टयितुमा
ह अयत्नादिति हे त्रिपुरहर दशास्यो रावणो अयत्नादनायासेन त्रिभुवनं त्रिलोकं अ
वैरव्यतिकरं शत्रुसंपर्करहितं आसाद्य संप्राप्य कृत्वा रणकंडूपरवशान् रणेया कंडूः ख

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं ११

र्जूस्तया परवशात्तदधीनान् पुद्भलं पदानित्यर्थः बाहूनभृतः धत्तेति यत् तदिदं स्थिराया
स्त्वद्भक्तेर्विस्फूर्जितं विस्फुरणं विजृंभणं किं भूतायास्तस्याः शिरःपद्मश्रेणिरचितचरणांभो
रुहबलेः शिरांस्येव पद्मानि पद्मानि तेषां श्रेणिः पंक्तिस्तया रचिता निर्मिता कृता चरणांभोरुह
योः पादपद्मयोर्बलिः पूजा यस्याः सा तथोक्ता तस्यास्त्वयि भक्तेः फलं निरूपितं ११ ११

म॰टी॰ इदानीं पातिरस्कारफलं निरूपयितुमाह अमुष्येति अमुष्य रावणस्य पाताले रसा
७ तलेपि प्रतिष्ठा अलभ्या दुर्लभासीत् किंभूतस्य भुजवनं भुजसमूहं बलाद्धठात्त्वदधिव
सतौत्वन्निवासस्थाने कैलासेपि विक्रमयतः किंभूतं भुजवनं त्वत्सेवा समधिगतसारं
त्वत्सेवया भवदाराधनेन समधिगतः प्राप्तः सारो बलं येन तत्तथोक्तं कस्मिन्सति यदि
अमुष्य त्वत्सेवा समधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रम
यतः अलभ्या पातालेप्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचि
तो मुह्यति खलः १२ अलसचलितांगुष्ठशिरास्तस्मिन्सति अत्रोक्तो ध्रुवं निश्चि
तः संपन्नः समृद्धः खलो दुर्जनो मुह्यति इत्यृतीति १२ इदानीं बाणासुरानुग्राहिणं भग
वंतं स्तुवन्नाह यदृद्धिमिति बाणे बाणो बाणासुरः सुत्राम्णो वासवस्यार्द्धिं संपदं सु ७
रेंद्रत्वं यदधश्चकारेति किंभूतामृद्धिं परमोच्चैः सतीमपि परमोन्नतामपि किंभूतो बा

णः परिजनविधेयत्रिभुवनः परिजनस्येव वश्ये वकस्येव विधेयं वश्यं त्रिभुवनं यस्य स
तथोक्तः तस्मिन्बाणे न तच्चित्रमाश्चर्यं भवति किंभूते त्वच्चरणयोस्त्वत्पादयोर्वरिवसि
तरि शुश्रूषके कमित्याह त्वयि शिरसि भूर्द्धं भवति न प्रणामः कस्य उन्नत्यैन भवति
अपि तु सर्वोन्नत्यै भवतीत्यर्थः १३ सांप्रतं कालकूटविषापहरणप्रतिपादनद्वारेण भग
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभु
वनः न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिर
सस्त्वय्यवनतिः १३ अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासी
द्यः स्तुवन्नाह अकांडेति हे त्रिपुरनयन विषं कालकूटं संहृतवतो निगिलितवतस्त
व कंठे यः कल्माषः कार्ष्ण्यमासीत्स जातः स श्रियं शोभां न कुरुते अपि तु अतनमेवआ

म॰टी॰ हेआश्चर्यंकिंविधस्यतवअकांडेअप्रस्तावेब्रह्मांडक्षयोविनाशस्तस्माच्चकितानामी
८ तानांयेदेवासुरास्तेषुकृपादयानस्याविधेयस्यतनुभ्रुस्फटिकसंकाशोनलत्वज
लणोविकारःकण्ठेनोभांकुरुतेइत्याह विकारोपीत्यादिनाभुवनभयभंगव्यसनि
नः [redacted] पुरुषस्यविकारोनरप्राक्तिरपिश्लाघ्यःप्रसंशनीयःतस्यतेनजग
घत्रिनयनविषंसंहरनवतः सकल्माषःकंठेतवनकुरुतेनाश्रियमहोविका
रोपिश्लाघ्योभुवनभयभंगव्यसनिनः १४ असिद्धार्थानैवक्वचिदपिसदेवा
दुक्रनिकृतंदूषणमप्यतिभूषणमेवेत्यर्थः १४ इदानींकामनिग्रहरूपरांस्तुतिमाह
असिद्धार्थेति इदानींस्मरस्यविशिखावाणाजगतिलोकेक्वचिदपिकदाचिदपिअसि
द्धार्थाअकृतकार्यानैवनिवर्त्तंते किंतुनित्यंकृतकार्याभवंतीत्यर्थः किंभूतस्यजयि ८
नःजयनशीलस्यकिंभूतेजगतिदेवासुरनरेतस्मिन्स्वर्गमर्त्यपातालेपीत्यर्थः स

रुएतादृशोपीशत्वामपिस्मरस्त्वामितरसुरासाधारणमन्यदेवतुल्यंपश्यन्नेवग
छन्स्मरणीयोऽभूत् अशरीरोऽभूदित्यर्थः अत्रोक्तेः वशिष्वात्मेश्वरेषुवाजितेंद्रि
येषुअन्येष्वपिपरिभावोऽवज्ञानंपथ्योनहिसुखकारीनभवतीत्यर्थः किंपुनःपरम
वशीनांपरमेश्वरेत्वयीत्यर्थः १५ अतिबलकपिंडाद्तोससंध्यासमयेजगदिदं
सुरनरेनिवर्त्तंतेनित्यंजगतिजयिनोयस्यविशिखाः सपश्यन्नीशत्वामितर
सुरसाधारणमभूत्स्मरःस्मर्तव्यात्मानहिवशिषुपथ्यःपरिभवः १५ महीपा
भक्तावितुमुघनस्तस्मिन्निवारणार्थंतस्मिन्कालेभवांस्तांडवंकरोतिसांप्रतितांडवसंबं
धात्स्तुतिकर्तुमाह महीति हेदेवजगद्रक्षामेजोकृत्यापायत्वंनटसिनृत्यसितांडवं
करोषिनतुनोविभुतामहत्त्वंवामैवकथ्यंमित्याह महीपृथ्वीपादाघातात्पादताडना

म॰टी॰
९

सहसा द्यौर्ग्र संशयपदं व्रजति अस्मिन्नास्ति संदेहं गच्छतीत्यर्थः तथा विष्णोः पदमाका
शं भ्राम्यद्भुजपरिघरुग्णग्रहगणमभूत् भ्राम्यंत इतस्ततश्चरतः ते च भुजाश्च एव
परिघा अर्गलास्तै रुग्णा भग्ना ग्रहाणां नक्षत्राणां गणाः समूहा यस्मिंस्तत्तथोक्तं अन्यच्च
वैरीत्यं ध्वौः स्वर्गसमूहः मुहुर्दौःस्थ्याद्दुःस्थत्वं याति गच्छति सा किंभूता अनिभृतजटाता

दाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं
मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव
विभुता १६ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृ

डिततटा अनिभृताभिर्निश्चलाभिर्जटाभिस्ताडितं तटं पार्श्वं यस्याः सा तथोक्ता १६
एवमगस्त्यमुनिना हस्तपात्रीकृतो जलनिधिस्ते परमेश्वरेण पुनर्देवैरभ्यर्थिते ९
न भगवता गंगाजलैः पूरितस्तत्प्रबंधां स्तुतिं कर्तुमाह । वियदिति हे देव वारां प

यः सोऽयं प्रवाहः अंभो वियद्व्यापी संप्रवाहस्तेन वह्निरसि जटामुकुटे पृषतवज्जविं
दुवल्लघुसूक्ष्मे यथा भवति तथा दृष्टः वियत् आकाशं व्याप्तुं शीलं यस्य स तथोक्तः स
किंविधः तारागणगुणितफेनोद्गमरुचिः ताराणां नक्षत्राणां गणाः समूहस्तेन गुणि
ताः गुंफिताः फेनोद्गमरुचिः शोभा यस्य स तथोक्तः तेन प्रवाहेण जगद्द्वीपाकारं कृतं च
लयध्यास्थितो भुवः खंडो द्वीपः तद्रूपमकारि किंविधं जलधिः समुद्रो वलयो यस्य स तथो
क्तं अनेनैव हेतुना दिव्यं सदानंदात्मकं वपु शरीरं धृतमहीमेत्युन्नेयं उन्नीयं ध
तो भवतो महिमा सर्वज्ञत्वं सर्वकर्तृत्वं च मेन वपुषा तत्तथोक्तं १७ संप्रति त्रिपुर
दहनतांडवविषयां स्तुतिमाह रथ इति हे देव त्रिपुरतृणं दिधक्षोर्दग्धुमिच्छोस्ते
न नेव कोऽयमाडंबरविधिः कोऽयं संभ्रमः अयं संभ्रम किमर्थमिति भावः तस्य
वाडंबरं दर्शयितुमाह रथः क्षोणी भूमिः यंता सारथिः शतधृतिर्ब्रह्मा अगेंद्रो हिमव

म.टी. वान्धनुः अथोनंतरं स्यांगे वक्रै चंद्रार्कौ सामस्त्यैौ रथचरणपाणिः विष्णुः शरोबा
१० णइतिशेषप्रकारवचने अथवाभुक्तमेवैतस्य प्रभुधियः स्वामिनोबुधयः फलतंत्रान्
स्वल्पफलप्रधाना नभवंति यावता फलं सिध्यंति तावद्देव संपादयंतीत्यर्थः किंविधा
प्रभुधियः विधेये मर्त्यैर्जनैः सद्भिरा क्रीडता विनोदयंत्यः त्रिपुरएव तृणं त्रिपुरतृणं
१८ हरिश्च पुत्रजाभार्थं ईश्वरपादयोः कमलसहस्रफलं कृतवानिति संबंधोस्त्या
तिमाह हरीरिति हे त्रिपुरहरहरीनारायणस्तेन ते पादयोश्चरणयोः साहस्रं संख्यो
पेतं कमलबलिं पद्मपूजा माधायनिहितयन् तस्मिन्नवचौ एकोनेकेन कमलेनोनेही
नेसतिनिजमात्मीयं नेत्रं कमलं कमलाकारं नेत्रमुद्धरन् उद्धृतवान् असौ भक्त्यु
द्रेकः भक्त्यतिशयः चक्रवपुषा चक्ररूपेण परीणतिं परिणामं गत प्राप्तः सन्त्र १०

याणां जगतां स्वर्गमर्त्यपातालानां रक्षायै त्राणाय जागर्तिप्रबुध्यते अप्रमत्तस्ति
ष्ठतीत्यर्थः १९ इदानीं मीमांसकादयो वेदस्य नित्यतामनुमानेन कदाचिदनि
त्यं जगति प्रतिपाद्य भागवतो जगत्कर्तृत्वं प्रतिपद्यनेतन्मननिराकरणद्वारेण दे
वंस्तोतुमाह क्रताविति हे देव क्रतोर्यागस्य क्रियात्मकत्वेनोत्पत्तिप्रध्वंसित्वा
दाशुत्वं चाप्ते क्रतौ सुप्ते विनष्टे सति क्रतुमतां यज्वानां फलयोगे स्वर्गादिफलसंबं
धे त्वं जाग्रदसि फलं दातुं सावधानोऽसि कथमेतदित्याह प्रध्वस्तं विनष्टं कर्म क्रिया
पुरुषाराधनमंतरेश्वराराधनं विना क्व फलति न कुत्रापि फलतीत्यर्थः अतः कार
णाज्ञानो लोकः क्रतुषु फलदानप्रतिभुवं फलदानानंतरं संप्रेक्ष्य विचार्य श्रुतौ
वेदवाक्ये श्रद्धां बध्वा विश्वासं कृत्वा कर्मसु योगेषु कृतपरिकरः कृतयत्नः २०

मृ.टी० ११ दृश्यंते पूर्वश्लोके निबंधमेवाह दक्षयागभ्रंशदृष्टांतेन दृढीकुर्वन्नाह क्रियादक्ष इ
ति हे शरणद क्रियादक्षः क्रियासंयोगेषु कुशलो दक्षः प्रजापतिः क्रतुपतिर्यजमा
नः किंभूतः तनुभृतां शरीरिणामधिपतिरीशः प्रजापतित्वात् ऋषीणामार्त्विज्यमृष
यो वसिष्ठादय एव ब्रह्मत्विज इत्यर्थः सुरसुरगणा इंद्रादय एवं सततस्यासदसि स्थि
ताः एवंविधासामग्रीनकस्यापि दक्षस्यैव त्वत्तो भवतः सकाशाद् देवक्रतुभ्रंशः
यागभ्रंशोऽभूत् किंविधात्त्वत्तः क्रतुषु फलविधानव्यसनिनः क्रतो फलस्य विधा
नेसंपादने व्यसनिनः उत्सुकात् एतद् युक्तं भवति त्वयि हीनत्वाद् दक्षस्येप्सितफल
प्राप्तिर्न संजाता युक्तमेतत् ध्रुवं निश्चितं श्रद्धाविधुरं विश्वासरहितं यथा क
र्तुः कुर्वतः पुरुषस्य मखा यागा अभिचाराय नाशाय भवंति २१ संप्रति ब्रह्मणो ११

दुहितृगामिगतस्य तस्य विरुद्धसामर्थ्यमैश्वर्यं स्तुवन्नाह प्रजानाथमिति
हे नाथ हे स्वामिन् धनुष्पाणेस्त्वेतव मृगव्याधरभसो मृगसुगोऽमुं प्रजानां
ब्रह्मणमाद्यपि न त्यजति न मुंचति किंभूतं प्रजानाथं प्रसभमत्यर्थं अभि
कं कामुकं अत एव स्वां दुहितरं स्वसुतां ऋष्यस्य वपुषा मृगशरीरेण रिरमयिषुं
रंतुमिच्छुं गतं विविधां दुहितरं रोहिद्भूतां मृगरूपां मृगीजातमित्यर्थः किंविधं
प्रजानाथं च संतं भीतं चकितं अत एव दिवं नाकाशं यातं पुनः किंभूतं सपत्ना
वनं सपरमस्य शरीरप्रवेशितमित्यर्थः ब्रह्मा निकामकत्वेन मृगीभूतां स्वसुता
मृगीरूपेण गतवानो धर्षिणमेनं शरेण दुःखीकृत्य ईश्वरो मृगो भूत्वाद्यापि अनुया
तीत्यर्थः २२ संप्रति दक्षाध्वरध्वंसनप्रकारं पुरस्मरस्तोतुमाह स्वलावण्याशंसेति

म०टी० हे वरद हे स्मरहर तवस्मशानेषुपितृकाननेष्वाक्रीडाविहरणंतवपिशाचाःसहचराः
१२ सहवासिनः तथालेपोऽनुलेपनंचिताभस्ममनूरीरदरुमायोपरिस्थितः कृष्ट
नियश्रितातत्राभवामिभस्तितं तवस्रगपिनृकपालसमूहः एवमनेनप्रकारे
णतदाखिलंशीलंस्वभावंअमंगल्यंअशुभंभवतुनामतथापिस्मरणांचिंति
तानांपरमसुष्टमंगलमसि २४ इदानींभवतःपरमतत्वनिरूपणद्वारेणस्तु
तिमाह मनसिति हे देवयमिनोयोगिनोंनरात्मनिकिमपितत्वमालोक्यसात्वि
दानीमप्रत्यक्तंगोचरंवस्तुद्दत्तात्ह्लादंसुखंदधतिधारयंतिकिंकृत्वेव अमृतमये
अमृतस्वरूपेहृदेजलाशयेनिमज्य मज्जयित्वाभवान्त्वमेवकिंजनाष्टः प्रसिद्धो
किंकृत्वाप्रत्यकविषयेभ्योनिवर्त्यचित्तेआत्मनिमनोंतःकरणंसविधंसप्र १२

कारंप्रयोगत्त्वास्तोक्तंयथाभवंतितथावस्थाप्यकिंभूताःयमिनःआत्तमारुतःआत्ता
गृहीतानिरुद्धामरुतःप्राणादिवायवोयैस्तेतथोक्ताः तथाप्रहृष्यद्रोमाणःप्रहृष्यति
पुलकिनाविशेमाणितनूरुहाणियेषांस्तेतथोक्ताः प्रमदसलिलानिहर्षाश्रूणितैरु
त्संगिताव्याप्तिन्नादृगदृष्टियेषांते २५ तैस्छान्तपीपयोछेनेलग्मोछे सांप्रतंह
गौरीरूपामिमदनपुरःसरंभगवतःपरमयोगित्वेस्तेउमाह स्वलावण्येतिहेपुरम
थनअरूप्यच्छिप्रंतणवनूतणमिवप्रुष्टंदग्धंधनधनुंगृहीतचापंपुष्पायुधेमद
नंपुरेग्रेतोदृष्ट्वापिदेवीगौरीहेयमनिरतदेहार्द्धे अर्द्धनारीरंघटनात्संजनात्वांमदि
स्त्रेणंस्त्रीपरतंत्रंस्त्रीवशमवैतिजानातिचेत्तर्हिहेवरदअद्धानिश्चितंमुग्धतयास्त्री
योमुग्धानतःअलेकिंभूतांगौरीस्वलावण्याशंसाआत्मसौंदर्येकीर्तयंती यमनेषुनि

म॰टी॰ यद्येवं नितरामसर्व्वज्ञो भगवान् तस्य संनिधौ यमनियमावासनप्राणायामौ ततः

१३ परं प्रत्याहारं धारणां तथा ध्यानसार्द्धसमाधिना अष्टांगान्याहुरेतानि योगिनो योगसं

सिनो अहिंसा सत्यमस्तेयं ब्रह्मचर्यकृपार्जवं क्षमा धृतिर्मिताहारः शौचं चेति यमा द

श इति यमनिरत २५ सांप्रतमष्टमूर्त्तिभेदद्वारेण भगवंतं स्तुवन्नाह त्वमिति हे

देव त्वमर्कः सूर्योसि त्वं सोमश्चंद्रोसि पवनो वायुरसि त्वं हुतवहोग्निः त्वमसि त्व

माप स्त्वमुदकमसि त्वं व्योम आकाशोसि त्वं धरणी भूमिरसि त्वमात्मा परमात्मा त्व

मसि एवमनेन प्रकारेण परिच्छिन्नामियत्तया विशिष्टां गिरं वाणीं त्वयि परिणता

स्त्वा स्व तत्त्वं बिभ्रतु दधतु वयं तु इह लोके यत्त्वं न भवसि तत्तत्त्वं वस्तु न विद्मो जा

नीमः २६ इदानीं प्रतिपाद्यत्वेन भगवंतं स्तोतुमाह त्रयीमिति हे शरणद ॐ मिती १३

दं प्रणवः समस्तं व्यस्तं समस्तरूपेण खंडरूपेण त्रपणविभागेन त्वां गृणाति स्तौति

किंविधं अकाराद्यैर्वर्णैस्त्रिभिरकारोकारमकारैर्वेतान्यभिदधत् कानि त्रयीं ऋग्यजुः

सामानि तिस्रो वृत्तीः उदात्तानुदात्तस्वरितलक्षणाः अधीयंते तथा उकारेण साम्यात्तु

दात्त मर्त्य विष्णवोभिधीयंते तथा मकारेण यजुर्वेदस्वरितपातालरूपः अभिधीयं

ते किंविधां मोंकारं ते तव तुरीयं चतुर्थं धाम स्थानं तेजो वा अणुभिरतिसूक्ष्मैर्ध्वनि

भिरवरुंधानं व्याप्नुवन् किंभूतं धाम तीर्णविकृति तीर्णा विकृतिर्येन तत्तीर्णविकृति

विकाररहितमित्यर्थः २७ इदानीं नामाष्टकद्वारेण स्तुतिमाह भव इति हे देव यदे

तद्भवाद्यभिधानाष्टकं अमुष्मिन्नामाष्टके श्रुतिर्वेदः प्रत्येकमेकं प्रविचरति वर्त्तते इ

ति हेतोः प्रियायास्मै धाम्ने पूर्वश्लोकप्रतिपादिताय तेजोरूपाय भवते तुभ्यं प्रणि

म॰टी॰ हितनमस्योस्ति २८ कृतनमस्कारोस्मि अथवा हे देव भवते नव प्रियास्मै धाम्ने तुरी
१४ यतेजसे प्राणिहितनमस्योस्मि २८ इदानीं भवतः सकलरूपतां प्रतिपादन्नाह नम इ
ति नेदिष्ठाय अंतिकतमाय शिवाय नमः निकटवर्त्तिने तुभ्यं नम इत्यर्थः तथा को
हे प्रियो दव प्रियो दवीयनं यस्य स प्रियदवः तस्य सर्वदुःखैदविष्ठाय दुरतराय शिवा
य नमः तथा क्षोदिष्ठाय क्षुद्रतराय नमः हे स्मरहर महिष्ठायोत्तमाय नमः त
था वर्षिष्ठाय वृद्धतराय भवते नमः हे त्रिनयन यविष्ठाय युवतराय ते नमः
तथा सर्वस्मै ते नमः अथ अतिसर्वाय सर्वमतिक्रांताय तुभ्यं तदीदं नमः अयं न
मस्कार इत्यर्थः २९ इदानीं सांख्यपातंजलिप्रतिक्रियास्तवन्नाह बहलेति रजो गु
ण उत्पत्तिहेतुस्तमोगुणो नाशहेतुः सत्वगुण हितहेतुः ईश्वरोपि रजउल्लसनिकरो १४